श्री अजय द्वारा प्रस्तुत

# भक्ति गंगा



## His Holiness Shri Datta Swami

# भक्ति गंगा


॥श्री दत्त गणपति भजनम्॥ ........ 1
॥श्री दत्त ब्रह्म गायत्री॥ ........ 1
॥ विष्णुचक्र स्तुति ॥ ........ 2
॥ सूदर्शन स्त्रोत्रम् ॥ ........ 2
॥ ब्रह्मास्त्र स्तुति ॥ ........ 3
॥श्री शङ्कर वन्दनम॥ ........ 3
॥कालाग्निशमनम् स्तोत्रम्॥ ........ 4
॥सङ्कटमोचन हनुमत् स्तुति॥ ........ 4
॥ कालभैरव वन्दनम् ॥ ........ 5
॥ श्री राम भजनम् ॥ ........ 6
॥श्री नरसिंह नमनम्॥ ........ 6
॥षोडश स्त्रोत्रमाला॥ ........ 6
॥श्री राहु-केतु नमनम्॥ ........ 9

## ॥श्री दत्त गणपति भजनम्॥

श्री दत्त गणपतिं भजे उन्मत्त नटन ताण्डवम्। मत्तेभवदन भासुरं चित्ताब्ज्य बोध भास्करम्॥१॥
आयत्त योगरजितं वित्तेश नित्य पूजितम्। उत्तानपाणि मुद्रितं श्री कृत्तिवाससः सुतं॥२॥
कैलासदृषदि नर्तनं भक्तान्तरंगवर्तनम्। पापौघ पाशकर्तनं श्री पार्वतीसुतं भजे॥३॥
लंबोदराङ्ग ताण्डवं मुद्राकराब्ज पण्डितम्। सर्वाङ्ग नाग मण्डनं वन्दे विनायकं पतिम्॥४॥
धिन्धिं मितकिट मर्तलं भंभं निनाद शङ्खकम्। आनन्द नृत्यतत्परं ध्यायामि प्रमथनायकम्॥५॥
आमोदकर मोदकं वेदान्तमति मादकम्। दुष्कर्म फल साधकं विघ्नेश्वरं गुरुं भजे॥६॥
सृष्टि स्थिति लय कारणं मूषाख्य दैत्य मारणम्। संसार जलधि तारणं स्तौमि प्रभु नरवारणम्॥७॥
पञ्चास्यमादि दैवतं देवर्षिभिः समर्चितम्। आलोक गलित सञ्चितं विघ्नाधिनाथमाश्रये॥८॥
लोकैक परम वैभवं लोकेश्वरादि संभवम्। आलोक परिहृतोद्भवं आलोकये परंभवम्॥९॥
श्री कृष्ण कवि निवेदितैः श्लोकाख्य मोदकैरिमैः। आनन्द गणपतिं पतिं आराधयन्तु साधकाः॥१०॥
श्री दत्त गणपतिं भजे। श्री दत्त गणपतिं भजे। श्री दत्त गणपतिं भजे॥

## ॥श्री दत्त ब्रह्म गायत्री॥

भज भज दत्तम्। भज भज दत्तम्।
भज भज दत्तम्। भज भज दत्तम्।

ॐ तत् सवितुः तत् देवतायाः वरेण्य भर्गो धीमहीह। प्रचोदयेद्वैः धीयोः योनः तं ब्रह्माणं ज्ञान सूर्यम्॥
प्राणेप्रसवात् यः प्रसिद्धः सवितेद्यस ब्रह्म तेजः। शिश्यधियश्च प्रेरयेन्नः तं गायत्री मन्त्र सारम्॥
गायत्रीयं छन्द एव सविता देवः स्मर्यतेच। शिश्यान्धकार मुकुलिताब्ज्य धीविकासदं गुरुवर्येण्यम्॥
कर्ता भर्ता ह्येश हर्ता सर्वस्यास्य श्रूयते हि। त्रिमूर्तिरूपं ब्रह्मचैकम् ब्रह्माकारं ब्रह्मवाजम्॥
त्रिपदं छन्दः त्रिस्वरोक्तं त्रिकालवन्द्यं त्रिगुणसूत्रम्। त्रिवाहिनीनां सङ्गमं वा त्रिमूर्ति तत्वं यंयनक्ति॥
ॐकारश्च त्रिविध वर्णाः तिस्रोव्याहृतः योऽपि यंहि। सम्बोधयन्ति सर्व मन्त्रो यमेववक्ति त्रिगुणमेकम्॥
चत्वारोयं वेद शुनकाः गौरनुसरतिच वेद धर्मः। वीणा श्रवणं वाणीपतिं षोडशवर्षं ब्रह्मदेवम्॥
जगदारम्भं हंस वाहं तेजोवदनं मन्त्र मूलम्। गायत्रीशं सामगानं विद्यानिलयं वेद पाठम्॥
यज्ञाचरणं होमनिष्ठं कमण्डलुधरं दर्भ पाणिम्। अग्निज्ज्वाला भासमानं प्रातः सन्ध्या बाल भानुम्॥
चन्दन तिलके कुङ्कुमाङ्कं ब्रह्म तेजसा दीप्यमानम्। त्रिजगन्मोहन सुन्दराङ्गं काशाय धरं पण्डितेशम्॥
अत्रेः पुत्रं ब्रह्म दत्तं अनसूयाम्बा प्रेमराशिम्। अजनमेखलं ब्रह्मदण्डं यज्ञोपवीतमक्षमालम्
स्वतनोरुज्जत् कमलगन्धैः त्रिभुवनानि ह्लादयन्तम्। ब्रह्ममुहूर्ते साधकानां प्रचोदयेत्ता धियो योनः॥
सृष्टि क्रमवद पुरुषसूक्तं त्रिस्वरबद्धं पावनार्थम्। ऋषिभिः पठितं ब्रह्म काले श्रुत्वा श्रुत्वा प्रीयमाणम्॥
त्रिमताचार्यैः पठ्यमानान् तत्तन्मतमय भाष्यवादान्। श्रुत्वा सिद्धाः तार्थमन्त्यं समन्वयमतं वाचयन्तम्॥
वेदन्तानाम् अन्तिमार्थं वेदन्तार्थं बोधयन्तम्। ऋषिभिः परितो भाषमाणं शास्त्रर्थेषु व्यञ्जितेषु॥
आयुधवर्जित पाणिपद्मं वचैः वारिं मारयन्तम्। कर्मफलानि ललाटपत्रे लिखन्तमायोः दाय दानम्॥
आचार्येन्द्रं वाक्प्रचारं भुविसञ्चारं निर्विचारम्। कलाभिचारं सदाचारं सुरपरिचारं चित्तचोरम्॥
पद्मसम्भवं पद्मपीठं पद्मसुगन्धं पद्मवर्णम्। पद्मापुत्रं पद्मनेत्रं पद्मसुपाणिं पद्मपादम्॥

वीणापाणिः यस्य शिष्या वाणीगायति ज्ञान देवी। तं वागीशं सामवाचा चरषोणाधर मन्त्रपाठम्॥
यत् सङ्कल्पः केवलंहि सर्वं विश्वं रचितमेवम्। आद्यं देवं प्रथम मूर्तिं आराधनेयामजमनादिम्॥
ललाटरेखां कर्मवर्धां परिमार्ष्टुम्यः केवलोहि। सर्वसमर्थो लेखकोयं धातारन्तं मूलमूलम्॥
चतुरांनायां चतुरवाचा चतुरास्याब्जैः रुतिरन्तम्। कविंकवीनां आदिकाव्यं सर्वजगदिदं विरचयन्तम्॥
अरव ब्रह्म ब्रह्म शब्दो यस्मिन्नेव प्रकृतिहेतौ। पूजातीतं परमपूज्यं दिवसारम्भे पूजनीयम्॥
गयत्र्याद्या यस्य भार्याः त्रिशक्तयस्ताः त्रिमुख पद्मम्। देवपितृणां पितरमेव पितामहाख्यं ब्रह्मरूपम्॥

॥फलश्रुतिः॥

श्री दत्त ब्रह्म गायत्रीं यो गायेद् ब्रह्म कालिकीम्। स ब्रह्म तेजसा दीप्तो ज्ञानी ब्रह्मत्वमश्नुते॥
शतायुर्दायमाप्नोति सर्व विद्याः प्रपद्यते। सत्पुत्रं लभते होवात् ऐश्वर्यम् ब्रह्म वीक्षितः॥
भज भज दत्तम्। भज भज दत्तम्। भज भज दत्तम्। भज भज दत्तम्।

## ॥ विष्णुचक्र स्तुति ॥

वन्दनीयं विष्णुचक्रं वारणार्थं छिन्ननक्रम्
खण्डितासुर वृत्तिवक्रं रक्षितामर लोकशक्रम्
वन्दनीयं विष्णुचक्रं वारणार्थं छिन्ननक्रम्

आश्रितामर भागध्येयं विक्रमोज्ज्वल मप्रमेयम्
आगमान्तर मन्त्र गेयं श्री सुदर्शन नाम ध्येयम्
वन्दनीयं विष्णुचक्रं वारणार्थं छिन्ननक्रम्

कार्तवीर्य महावतारं चोरदण्डन लोक चारम्
धारयाहृत भूमि भारं विद्युदुज्ज्वल वल्लिहारम्
वन्दनीयं विष्णुचक्रं वारणार्थं छिन्ननक्रम्

माधवाङ्गुलि नाभि सारं दत्तभक्त विपत्तिपारं
अष्ट सिद्धि महत्त्वपूरं शत्रुकर्तन कोटिहीरम्
वन्दनीयं विष्णुचक्रं वारणार्थं छिन्ननक्रम्

## ॥ सूदर्शन स्त्रोत्रम् ॥

प्रस्थितं हि। प्रस्थितं हि। श्री विष्णु चक्रम प्रस्थितं हि।
अग्निकण विद्युत्दीधिति शोण श्वेत नील धारारुची।
स्वार्थ पर्वतं खण्डयति लोभ गुणञ्च चूर्णयति।
संरक्षित शक्रं परिखण्दित नक्रम्। हत सर्व वक्रं श्री सुदर्शन चक्रम्॥
कार्तवीर्यार्जुन स्वरूपं सर्व देवता दत्त धूपम्।

दग्ध पञ्च महापापं नारायण हृदय दीपम्।
दत्त भक्ताय वीराय कार्तवीर्यार्जुनायते।
सहस्र बाहवे कुर्यां सहस्रं वन्दनान्यहम्।
ॐ कार्तवीर्याय विद्महे सहस्र कराय धीमहि। तन्नो हैहय प्रचोदयात्॥

## ॥ ब्रह्मास्त्र स्तुति ॥

नमो नमो ब्रह्मास्त्राय सर्व शोक विनाशकाय
सान्ध्य दीधिती भामयाय वेदमन्त्र प्रज्ज्वलनाय
नमो नमो ब्रह्मास्त्राय सर्व शोक विनाशकाय

इच्छायैव व्यर्थ जगते सर्व साध्य विभूति महते
अप्रतीपा मेव विशते ब्रह्म तेजो राशि लसते
नमो नमो ब्रह्मास्त्राय सर्व शोक विनाशकाय

जप कमण्डलु तोय जाया ब्रह्म वाक्य विजृम्भिताय
सर्व दैवत वन्दिताय सेवकायित सर्वास्त्राय
नमो नमो ब्रह्मास्त्राय सर्व शोक विनाशकाय

अनघा शक्ति प्रचोदकाय दत्तात्रेय स्वरूपकाय
आगम विद्युदुज्ज्वलाय ज्ञानमाग्नि ज्वालिकाय
नमो नमो ब्रह्मास्त्राय सर्व शोक विनाशकाय

## ॥श्री शङ्कर वन्दनम॥

### श्री स्वामी विरचितम्

शङ्करायते लोक शङ्करायते वन्दनानि मे देव वासुदेवस्य॥

फाल लोचनं तव हि मे सुदर्शनम् शूलमेव ते तिलकमूर्ध्व पूण्ड्रकम्।
नील कण्ठ ते भाति कण्ठ नीलिम विस्तरान्महो मम हि देह नीलिम॥

शङ्करायते लोक शङ्करायते वन्दनानि मे देव वासुदेवस्य॥

फाल चक्षुषा दग्ध पद्मसायकम् सादराक्षिणा दृष्टपद्म सम्भवम्।
प्रेमविक्षण लोल पद्म लोचनम् त्वाम् त्रिलोचनं देव संस्मराम्यहम्॥

शङ्करायते लोक शङ्करायते वन्दनानि मे देव वासुदेवस्य॥

नटन पण्डित स्फुरति रम्य ताण्डवम् चित्र मण्डलं भ्रमण लोल कुण्डलम्।
उरगमण्डन स्खलित धर्म दण्डनम् दनुज खण्डनं विजित भारती भण्डनम्॥

शङ्करायते लोक शङ्करायते वन्दनानि मे देव वासुदेवस्य॥

## ॥कालाग्निशमनम् स्तोत्रम्॥

कामये कालाग्नि शमनम् कामये कालाग्नि शमनम्।
कालकालं करुणालवालम् कालभैरवम्॥
मायाजालं मदिरालोलम्। मुनिजनपालं महाभीकरशूलम्॥
पिङ्गल जटाजूटम् पादोधावित खेटं।
गर्जनोज्ज्वल विस्फोटं प्रस्थान महर्भाटम्॥
शिरश्चन्द्रखन्ण्डम् भालाग्निकुण्डम्।
भ्रामित कालदण्डम् कम्पमान जगदण्डम्॥

## ॥सङ्कटमोचन हनुमत् स्तुति॥

सागर लङ्घन सङ्कुल वानर कुलमवलोक्य निजस्तुति लोलम्
जलधर चुम्बि महाकृतिरेक पदक्रम लङ्घित जलनिधिरेवम्
रधुपतिमानन्दयसिच सीता कुशल निवेदन गुतघन शोकम्
कोनहि वेत्ति कपीश जगद्यति सङ्कट मोचन नामतवेदम् ॥१॥

अहिकुल बन्धन मोहित दाशरथीद्वयमालोक्य मनोविकलम्
खगपति मानयसिस्म विकुण्ठ उरगतमस्त्र विमोचन दक्षम्
पुनरायोधन बलिनं महसिच भुजयुग रूढं सोदर युग्वम्
कोनहि वेत्ति कपीश जगद्यति सङ्कट मोचन नामतवेदम् ॥२॥

मूर्छित लक्ष्मण बोध समर्थ महौषधि सञ्जीवीलतां नेतुम्
उत्पदसि क्षणमद्रिमुपानयसिस्म करेणतमिव सुमगुच्छम्
उत्तिथ लक्ष्मण करयुग वंदन मालिङ्गसि विहसंच सरागम्
कोनहि वेत्ति कपीश जगद्यति सङ्कट मोचन नामतवेदम् ॥३॥

शतमुख रावण हृतरघुनायक मम्बाबलिपशु मुपगत मोहम्
पुनरानयसिचतमसुर मपगत जीवं विधाय पातालेशम्
राघव शरमुर्ध्वमुखं कृत्वा नम्रं हरसिचयुधि दशकण्ठम्
कोनहि वेत्ति कपीश जगद्यति सङ्कट मोचन नामतवेदम् ॥४॥

शृङ्खलयानियत शनैशचरमपि मोचयसिस्म शुच सहसातम्
कोमेसङ्कट इह हनुमन्गुरु सोदरमामवदल्यादीनम्
कथमपियोग्यो नाहमकारण करुणैव तवहि कारणमेकम्
कोनहि वेत्ति कपीश जगद्यति सङ्कट मोचन नामतवेदम् ॥५॥

वानरसिंहखगेशवराह हयानन पञ्चानन शिवरूपम्
वैष्णवतिलकं भविष्यजगतां धातारन्त्वां नमामिदेवम्
त्रिमुर्तितत्वं साक्षाद्दत्तं परमब्रह्महि लीलादासम्
कोनहि वेत्ति कपीश जगद्यति सङ्कट मोचन नामतवेदम् ॥६॥

हे गणकांशुक काञ्चनकुण्डल वन्दे त्वांहनुमन्तमनन्तम्
हे पिङ्गलाक्ष सद्गुण सागर मामवसततं मायामूढम्
हे मेरूगिरि समुज्ज्वलविग्रह मालयमान्तव पदयुगलोलम्
कोनहि वेत्ति कपीश जगद्यति सङ्कट मोचन नामतवेदम् ॥७॥

सङ्कट मोचन हनुमद्देव महास्तुति वेतां गायतिनित्यम्
योमनुज सः समेतिशतायु बलमारोग्यं तेजोधैर्यम्
शतशत सङ्कट जालमपि क्षणमेव विनश्यति याति स तोषम्
कोनहि वेत्ति कपीश जगद्यति सङ्कट मोचन नामतवेदम् ॥८॥

## ॥ कालभैरव वन्दनम् ॥

भैरवायते काल भैरवायते प्रदक्षिणानिमे देव मूढ भक्तस्य।

काशिकापुरी क्षेत्रलोक पालनं पिङ्गलेक्षण स्फुरणमात्रमेव ते।
भुवन भाण्डक प्रलयभस्म कारको गर्जनोद्धत ध्वनिकणस्तव प्रभो।।
भैरवायते काल भैरवायते प्रदक्षिणानिमे देव मूढ भक्तस्य॥

अष्टसिद्धयोऽप्यष्ट भूतिभिस्सह भूतनाथते करुणलेष संभवाः।
सारमेयव त्वयिसमर्पितार्थिनां बोधयस्यहो शुनकवाहनन्तव॥
भैरवायते काल भैरवायते प्रदक्षिणानिमे देव मूढ भक्तस्य॥

अरूण वाससं भैक्षभस्त्रिका भूजं साग्निपात्रकं कृफल मार्जने धरम्।
श्मश्रुभिकरं कालदण्ड मण्डितं कालिकापतिं कालकाल माश्रये॥
भैरवायते काल भैरवायते प्रदक्षिणानिमे देव मूढ भक्तस्य॥

## ॥ श्री राम भजनम् ॥

भज भज भास्कर कुलसञ्जातं रामं शाङ्र्गधनुर्धर्मेतमं
निष्कामभक्ति तपसाक्रीतं ज्ञानाग्निवचन तेजश्शातम्
धर्मस्थापन लक्ष्यमुपेतं साक्षान्नारायण मायातम् ॥ भज भज...॥

वालमिकी सुकवि कवितागीतं स्वादर्शकथा गङ्गापूतम्
हनुमत्भुज पिठासन नीतं केवलसायक दशमुखपातम् ॥ भज भज...॥

पट्टाभिषेक सुरसमवेतं वामाङ्गासन सीताप्रितं
स्वचरितगायक कुशलवतातं सकलचराचर सुत्रप्रोतम् ॥ भज भज...॥

## ॥श्री नरसिंह नमनम्॥

नमोनारसिंह विधुतास्मदं ह
अहोपिङ्गलाक्षाग्नि जाज्वल्यमान स्फुरन्नासनिश्वास संहाररम्भ
जटापावकज्वालिकादीप्यमान ॥१॥

महाक्रोधवह्नि छटाविस्फुलिङ्ग नखैर्दंष्ट्रिकाभिः महाघोररूप
महागर्जनोग्रध्वनिध्वस्त लोक॥२॥

हिरण्यासुरप्राण नैवेद्यलोल रमादैवत प्रार्थनाक्षेपकोप
महाभक्तबालस्तुति प्रियमाण ॥३॥

पूरोमङ्गलाग्रीश मध्योज्ज्वलास्य प्रपन्नार्तिसद्यो विमोक्षप्रदाता
पराभक्तिमार्गैक संसेव्यमान ॥४॥

## ॥षोडश स्त्रोत्रमाला॥

श्री गणेश

श्री मूषिकन्यस्त पाद पद्मायते। वामहस्तालोल धौत दन्तायते।
चारुनृत्यायते विघ्न राजायते। श्री पार्वती प्राणपुत्राय वन्दनम्
सिद्धि बुद्धि प्राण नाथाय वन्दनम्॥

श्री वीरभद्र

दक्षक्रतुन्यस्त पाद पद्मायते। वामहस्तालोल तीक्ष्ण खड्गायते।

श्मश्रु वक्त्रायते वीरभद्रायते। श्री कालिका प्राण नाथाय वन्दनम॥
श्री कालिका प्राण नाथाय वन्दनम॥

श्री षण्मुख

क्रौञ्चाचलन्यस्त पाद पद्मायते। वामहस्तालोल शक्ति भल्लायते।
षण्मुखाब्जायते तारकन्तायते। वल्लीश्वरी प्राण नाथाय वन्दनम्॥
वल्लीश्वरी प्राण नाथाय वन्दनम्॥

श्री शिव

श्रीशैल विन्यस्त पाद पद्मायते। वामहस्तालोल काल शूलायते।
भालनेत्रायते भस्म वक्त्रायते। भ्रमराम्बिका प्राण नाथाय वन्दनम्॥
भ्रमराम्बिका प्राण नाथाय वन्दनम्॥

श्री मणिकण्ठ

शबरी गिरिन्यस्त पाद पद्मायते। वामहस्तालोल मन्त्रमालायते।
हरिहरांशायते सुमणिकण्ठायते। श्री मोहिनी प्राण पुत्राय वन्दनम्॥
श्री मोहिनी प्राण पुत्राय वन्दनम्॥

श्री वेङ्कटेश्वर

सप्तशैलन्यस्त पाद पद्मायते। वामहस्तालोल केलि पद्मायते।
पद्म नेत्रायते पद्म वक्त्रायते। पद्मासती प्राण नाथाय वन्दनम्॥
पद्मावती प्राणनाथाय वन्दनम्॥

श्री सूर्य

प्राचीदिशिन्यस्त पाद पद्मायते। वामहस्तालोल शुक्ल वेदायते।
अरुणबिम्बायते सूर्यदेवायते। छायासती प्राण नाथाय वन्दनम्॥
छायासती प्राण नाथाय वन्दनम्॥

श्री कृष्ण

गोवर्धनन्यस्त पाद पद्मायते। वामहस्तालोल चक्रवेगायते।
मकुट पिञ्छायते मधुर वंशायते। राधासती प्राण नाथाय वन्दनम्॥
राधासती प्राण नाथाय वन्दनम्॥

श्री राम

साकेत विन्यस्त पाद पद्मायते। वामहस्तालोल चारुचापायते।
सत्यवाक्यायते धर्मरूपायते। सीतासती प्राण नाथाय वन्दनम्॥
सीतासती प्राण नाथाय वन्दनम्॥

श्री हनुमान्
आकाश विन्यस्त पाद पद्मायते। वामहस्तालोल भूरिशैलायते।
रामकार्यायते भीमवीर्यायते। सुवर्चला प्राण नाथाय वन्दनम्॥
सुवर्चला प्राण नाथाय वन्दनम्॥

श्री अग्नि
यज्ञान्तरन्यस्त पाद पद्मायते। वामहस्तालोल होमपात्रायते।
सप्तजिह्वायते द्रव्यवाहायते। स्वाहासती प्राण नाथाय वन्दनम्॥
स्वाहासती प्राण नाथाय वन्दनम्॥

श्री इन्द्र
ऐरावतन्यस्त पाद पद्मायते। वामहस्तालोल हेति वज्रायते।
स्वर्गनाथायते देवराजायते। शचीसती प्राण नाथाय वन्दनम्॥
शचीसती प्राण नाथाय वन्दनम्॥

श्री आदिशेष
क्षीरार्णवन्यस्त पाद पद्मायते। वामहस्तालोल नाग पाशायते।
विष्णु तल्पायते शेषदेवायते। नागेश्वरी प्राण नाथाय वन्दनम्।।
नागेश्वरी प्राण नाथाय वन्दनम्।।

श्री गरुड
वैकुण्ठ विन्यस्त पाद पद्मायते। वामहस्तालोल पूर्णकुम्भायते।
विष्णु वाहायते गरुड राजायते। विनताम्बिका प्राण पुत्राय वन्दनम्॥
विनताम्बिका प्राण पुत्राय वन्दनम्॥

श्री कालभैरव
ब्रह्माण्ड विन्यस्त पाद पद्मायते। वामहस्तालोल कालपाशायते।
दत्तदूतायते भैरवाख्यायते। मायासती प्राण नाथाय वन्दनम्॥
मायासती प्राण नाथाय वन्दनम्॥

श्री दत्तात्रेय
सह्यशैलन्यस्त पाद पद्मायते। वामहस्तालोल बीजमालायते।
अरुणवस्त्रायते योगिराजायते। अनघासती प्राण नाथाय वन्दनम्॥
अनघासती प्राण नाथाय वन्दनम्॥
अनघासती प्राण नाथाय वन्दनम्॥

श्री दत्त स्वामि
विजयपुरीन्यस्त पाद पद्मायते वामहस्तालोल वेदशास्त्रायते
ज्ञानसूर्यायते दत्तरूपायते श्रीवेणुगोपाल कृष्णाय वन्दनम्॥
श्रीवेणुगोपाल कृष्णाय वन्दनम्॥

## ॥श्री राहु-केतु नमनम्॥

नमोनमो श्री राहुकेतुभ्याम।

नमोनमो राहु केतुभ्याम॥
रवि शशि ग्राहकाभ्याम राक्षस शरीरार्ध भागाभ्याम्।
महासर्पमस्तक कायाभ्यां महीवलयछाया ग्राभ्याम्।
मह्रा मह्रा पराक्रमाभ्याम्॥

नमोनमो राहुकेतुभ्या।
दुष्कर्म फलदान दुताभ्याम दुर्जन गुण परिवर्तन रक्षाभ्याम्।
दीनजनार्ति भक्तिदायकाभ्याम्।

नमोनमो राहुकेतुभ्याम्।
अपसल्य जिवर्ध्य अपसल्य जराभ्याम्।
तमोगुण नाशाय तमोग्रह्राभ्याम्।
असुररूप जनार्ध असुरायिताभ्याम्॥

नमोनमो राहुकेतुभ्याम्।
कयानश्चित्त केतुम ग्रुन्वन मन्त्रमंदिराभ्याम्।
मासपूप कुलु थपाकदान प्रशमिदाभ्याम्।
भानु वासर नागरूप कन्द पूजा प्रियाभ्याम्॥

नमोनमो राहुकेतुभ्याम्।
परमपद सोपान मार्ग परिक्षा पन्नकाभ्याम्।
कुटिल कुण्डलिनी वृत्ति भुजगि शासगोरकाभ्याम्।
कष्ट प्रदान परिणकिपरिणाम मोक्षप्रदाभ्याम्॥

नमोनमो राहुकेतुभ्याम्।
रवि शशि ग्राहकाभ्याम राक्षस शरीरार्थ राजाभ्याम्॥